# प्रकृतिसिद्धमिदं हि महात्मनाम्।

---

**Que.1. प्रदत्तां खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।** **[Marks :(4)]**

**महाकविः कालिदासः विक्रमादित्यस्य सदस्यः आसीत्। सः विक्रमा दित्यस्य सदसि नवरत्नेषु अन्यतमः च।सः रघुवंशं, कुमारसम्भवम् इति महाकाव्य द्वयम् अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयमं, मालविकाग्निमित्रम् इति नाटकत्रयं मेघसन्देशम् सन्देशकाव्यं ऋतुसंहारम् इति खण्डकाव्यं च विरचितवान्। तस्य अभिज्ञानशाकुन्तलं नाटकानां मध्ये अत्यन्तम् उन्नतं स्थानम् आवहति।**

**क. कालिदासः कस्य सदस्यः आसीत् ?**

**ख. नवरत्नेषु अन्यतमः कः ?**

**ग. कालिदासेन विरचिते महाकाव्ये के ?**

**घ. किं नाटकानां मध्ये अत्यन्तम् उन्नतस्थानम् आवहतिः ?**

**ङ. कालिदासेन विरचितं सन्देशकाव्यं किम् ?**

**Ans.** प्रदत्तां खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।

क. विक्रमादित्यस्य।

ख. महाकविकालिदासः।

ग. रघुवंशम्, कुमारसंभवम्।

घ. अभिज्ञानशाकुन्तलम्।

ङ. मेघसन्देशम्।

**Que.2. मातृभाषायां विवर्तयत।** **[Marks :(5)]**

**अगतीनां माता इति विश्रुता मदर् तेरेसा 1910 तमे वर्षे अल्बेनिया देशे जाता। तस्याः यथार्थनाम आग्नस् इति आसीत्। मिषिनरि ओफ् चारिट्टि इति संघटनायाः स्थापिका आसीत्। अनाथानां रोगातुराणां च शुश्रूषार्थं सा जनान् प्रैरयत्। सा भारतरत्नेन तथा नोबल् पुरस्काराभ्यां च आद्दता आसीत् ।**

**Ans.** मातृभाषायां विवर्तयत।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।

**Que.3. उदाहरणानुसारं लिखत।** **[Marks :(3)]**

**क. १ ----------- - वाक्चातुर्यम्**

**२ ----------- -वाक्सामर्थ्यम्**

**उदा- प्रकृतिसिद्धम् - प्रकृत्या सिद्धम्**

**ख. १ शक्तिसिद्धम् -----------------।**

**२ क्रियासिद्धम् -----------------।**

**३ जन्मसिद्धम् -----------------।**

**उदा- महान् आत्मा यस्य सः - महात्मा।**

**ग. १ दुष्टः आत्मा यस्य सः - -----------------।**

**२ शुद्धः आत्मा यस्य सः -----------------।**

**Ans.** उदाहरणानुसारं लिखत।

क) १ वचसि चातुर्यम्।

२ वचसि सामर्थ्यम्।

ख) १ शक्त्यासिद्धम्

२ क्रिययासिद्धम्।

३ जन्मना सिद्धम्।

ग) १ दुष्टात्मा।

२ शुद्धात्मा

**Que.4. स्वभावरूपीकरणाय सुभाषितानि कथम् उपकारकाणि इति सूचनानुसारं लिखत। [Marks :(4)]**

**सूचनाः - सुष्ठु भाषितं सुभाषितम् ---- दानं सर्वदुखानि हन्ति -----क्षमायाः महत्वं ---- विद्या एव सदा सर्वश्रेष्ठं द्रव्यम्। -----सर्वमपि कार्यं सत्याधिष्ठितं भवति---- महात्मनां स्वभाववर्णना च।**

**Ans.** स्वभावरुपीकरणाय सुभाषितानि कथमुपकारकाणि इति सुचनानुसारं लिखत।

आशयस्य कृते ।

भाषाशैली ।

वाक्यघटना ।

**Que.5. यथोचितं योजयत। [Marks :(4)]**

**क) परः - आपदि**

**करः - ईश्वरस्य**

**भगवतः - हस्तः**

**विपदि - अन्यः ।**

**ख) यान्ति - वदन्ति**

**उपैति - गच्छन्ति**

**हन्ति - प्राप्नोति**

**आहुः - नाशयति।**

**Ans.** यथोचितं योजयत।

1. अन्यः।

हस्तः।

ईश्वरस्य।

आपदि।

2 गच्छन्ति।

प्राप्नोति।

नाशयति।

वदन्ति।

**Que.6. सूचकानि उपयुज्य श्लोकस्य आशयं लिखत।** **[Marks :(4)]**

**क) क्षमाशस्त्रं करे यस्य**

**दुर्जनः किम् करिष्यति ।**

**अतृणे पतितो वह्निः**

**स्वयमेवोपशाम्यति।।**

**सूचकाः- यस्य हस्ते ---- आयुधमस्ति तस्य अपायं कर्तुम्---- तृणरहिते ---- देशे----स्वयं नश्यति एव।**

**ख) सर्वद्रव्येषु विद्यैव**

**द्रव्यमाहुरनुत्तमम्।**

**अहार्यत्वादनर्घ्यत्वा-**

**दक्षयत्वाच्च सर्वदा।।**

**सूचकाः- अपहर्तुम् अयोग्यत्वात् ---- सर्वसम्पदां मध्ये---- एव सदा ----सर्वश्रेष्ठम्---- पण्डिताः वदन्ति।**

**ग) विपदि धैर्यमथाभ्युदये क्षमा**

**सदसि वाक्पटुता युधि विक्रमः।**

**यशसि चाभिरुचिर्व्यसनं श्रुतौ**

**प्रकृतिसिद्धमिदं हि महात्मनाम्।**

**सूचकाः- आपत्काले----औन्नत्ये---- सज्जनसभायाम्---- युद्धेषु---- कीर्तौ----विद्याभ्यसने तत्परता----एव भवति।**

**Ans.** सूचकानि उपयुज्य श्लोकस्य आशयं लिखत।

सूचनास्वीकारः ।

क्रमशः लेखनम् ।

भाषाशैली ।

**Que.7. उदाहरणानुसारं लिखत। [Marks :(3)]**

**१. उदा - वैराण्यपि - वैराणि + अपि**

**गृहाण्यपि ----------- + ----------**

**सर्वाण्यपि ----------- + ----------**

**मित्राण्यपि ----------- + ----------**

**२. उदा परोऽपि -परः + अपि**

**वरोऽपि ----------- + ----------**

**सुन्दरोऽपि ----------- + ----------**

**गायकोऽपि ----------- + ----------**

**३. उदा पतितो वह्निः -पतितः+ वह्निः**

**कुपितो राजा ----------- + ----------**

**भगवतो रूपम् ----------- + ----------**

**४. उदा एवोपशाम्यति -एव + उपशाम्यति**

**तप्तोदकम् ----------- + ----------**

**एवोक्तम् ----------- + ----------**

**एवोच्यते ----------- + ----------**

**५. उदा विद्यैव -विद्या + एव**

**तथैव ----------- + ----------**

**अथैव ----------- + ----------**

**तत्रैव ----------- + ----------**

**६. उदा आहुरनुत्तमम् -आहुः + अनुत्तम्**

**बाहुरपि ----------- + ----------**

**गुरुरपि ----------- + ----------**

**आहुरपि ----------- + ----------**

**७. उदा अक्षयत्वाच्च -अक्षयत्वात् + च**

**न्यवेदयच्च ----------- + ----------**

**अवदच्च ----------- + ----------**

**भवेच्च ----------- + ----------**

**८. उदा अथाभ्युदये -अथ+ अभ्युदये**

**चाभिरुचिः ----------- + ----------**

**ममापि ----------- + ----------**

**तवापि ----------- + ----------**

**Ans.** उदाहरणानुसारं लिखत।

1. गृहाणि+ अपि।

सर्वाणि +अपि ।

मित्राणि +अपि।

2. वरः+ अपि।

सुन्दरः +अपि।

गायकः+ अपि।

3. कुपितः+ राजा।

भगवतः+रूपम्।

4. तप्त+ उदकम्।

एव+उक्तम्।

एव+उच्यते।

5. तथा+एव।

अथ+एव।

तत्र+एव।

6. बाहुः+अपि।

गुरुः+अपि।

आहुः+अपि।

7. न्यवेदयत्+च।

अवदत्+च।

भवेत्+च।

8. च+अभिरुचिः।

मम+अपि।

तव+अपि।

**Que.8. सुभाषितं पठित्वा सूचनानुसारं गद्यक्रमं लिखत।** **[Marks :(2)]**

**१. दानेन भूतानि वशीभवन्ति**

**दानेन वैराण्यपि यान्ति नाशम्।**

**परोऽपि बन्धुत्वमुपैति दानै-**

**र्दानं हि सर्वव्यसनानि हन्ति।।**

**सूचना- भूतानि ----वशीभवन्ति----दानेन ---- यान्ति । परोऽपि दानेन ---- । दानं ---- हि हन्ति।**

**२ क्षमाशस्त्रं करे यस्य**

**दुर्जनः किम् करिष्यति ।**

**अतृणे पतितो वह्निः**

**स्वयमेवोपशाम्यति।।**

**सूचना- यस्य करे ---- किं करिष्यति ---- पतितो ---- स्वयमेव ----।**

**३ सर्वद्रव्येषु विद्यैव**

**द्रव्यमाहुरनुत्तमम्।**

**अहार्यत्वादनर्घ्यत्वा-**

**दक्षयत्वाच्च सर्वदा।।**

**सूचनाः - आहार्यत्वात् ----अक्षयत्वात् च ----विद्या एव ----अनुत्तमं ----इति आहुः।**

**४. सत्यं परः सदाचारः**

**सत्यं सर्वस्य जीवितम्।**

**सत्यं भगवतो रूपम्**

**सर्वं सत्ये प्रतिष्ठितम्।।**

**सूचनाः - सत्यं परः ----सत्यं सर्वस्य ----- भवति सत्यं ----रूपं -----सर्वं प्रतिष्ठितमस्ति।**

**५. विपदि धैर्यमथाभ्युदये क्षमा**

**सदसि वाक्पटुता युधि विक्रमः।**

**यशसि चाभिरुचिर्व्यसनं श्रुतौ**

**प्रकृतिसिद्धमिदं हि महात्मनाम्।**

**सूचनाः - धैर्यम् अभ्युदये क्षमा , सदसि ---- युधि ---- यशसि अभिरुचिः ---- च , इदं सर्वं महात्मनां प्रकृतिसिद्धं हि भवति।**

**Ans.** सुभाषितं पठित्वा सूचनानुसारं गद्यक्रमं लिखत।

उचितगद्यक्रमलेखनाय पूर्णाङ्कः।

**Que.9. आशयं पठित्वा श्लोकं विवेचयतु। [Marks :(2)]**

**१. दानं सर्वव्यसनानि हन्ति - इत्याशययुक्तं श्लोकं चित्वा लिखत।**

**क] दानेन भूतानि वशीभवन्ति**

**दानेन वैराण्यपि यान्ति नाशम्।**

**परोऽपि बन्धुत्वमुपैति दानै-**

**र्दानं हि सर्वव्यसनानि हन्ति।।**

**ख] सर्वद्रव्येषु विद्यैव**

**द्रव्यमाहुरनुत्तमम्।**

**अहार्यत्वादनर्घ्यत्वा-**

**दक्षयत्वाच्च सर्वदा।।**

**२. सर्वं महात्मनां प्रकृतिसिद्धं भवति - इत्याशययुक्तं श्लोकं चित्वा लिखत।**

**क] क्षमाशस्त्रं करे यस्य**

**दुर्जनः किम् करिष्यति ।**

**अतृणे पतितो वह्निः**

**स्वयमेवोपशाम्यति।।**

**ख] विपदि धैर्यमथाभ्युदये क्षमा**

**सदसि वाक्पटुता युधि विक्रमः।**

**यशसि चाभिरुचिर्व्यसनं श्रुतौ**

**प्रकृतिसिद्धमिदं हि महात्मनाम्।।**

**३ सत्यस्य महत्वप्रतिपादकं सुभाषितं चित्वा लिखत।**

**क] सर्वद्रव्येषु विद्यैव**

**द्रव्यमाहुरनुत्तमम्।**

**अहार्यत्वादनर्घ्यत्वा-**

**दक्षयत्वाच्च सर्वदा।।**

**ख] सत्यं परः सदाचारः**

**सत्यं सर्वस्य जीवितम्।**

**सत्यं भगवतो रूपम्**

**सर्वं सत्ये प्रतिष्ठितम्।।**

**Ans.** आशयं पठित्वा श्लोकं विवेचयतु।

उचितस्य श्लोकस्य चयनाय पूर्णाङ्कः।

**Que.10. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** **[Marks :(1)]**

**१. दानेन ---------- वशीभवन्ति।**

**(भूतानि,जलानि,वनानि,वैराणि)**

**२. केन वैराण्यपि यान्ति नाशम्?**

**(ज्ञानेन,दानेन,विनयेन,वैराग्येण)**

**३. किम् सर्वव्यसनानि हन्ति?**

**(मानम्,धनम्,दानम्, विनयम्)**

**४. वह्निःइत्यस्य अर्थः कः?**

**(जलम्, क्षीरम्, अग्निः,वायुः)**

**५. अनुत्तमं द्रव्यं ------- एव।**

**(विद्या, धनम्, दया, क्षमा)**

**६. सर्वं कुत्र प्रतिष्ठितम्?**

**(धने,सत्ये ,दाने,ज्ञाने)**

**७. विपदि ---------महात्मनां प्रकृतिसिद्धम्।**

**(क्षमा,विक्रमः,धैर्यम्,विनयम्)**

**८. अभ्युदये ------------ महात्मनां प्रकृतिसिद्धम्। (वाक्पटुता,क्षमा,धैर्यम्,विक्रमः)**

**९. सदसि ----------- -महात्मनां प्रकृतिसिद्धम्।**

**(वाक्पटुता,क्षमा,धैर्यम्,विक्रमः)**

**१०. युधि -------------महात्मनां प्रकृति सिद्धम्।**

**Ans.** कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

1. भूतानि।

2. दानेन।

3. दानम्।

4. अग्निः।

5. विद्या।

6. सत्ये।

7. धैर्यम्।

8. क्षमा।

9. वाक्पटुता।

10. विक्रमः।